सरयू तीर शृंगार विपिन में अति अनूप छवि न्यारी।
सुमन सिंगार किये नख शिख लौं निज कर श्याम संवारी।।

"श्रीरामानन्द साहित्य माला" पुष्प ७५ वाँ

श्रीसीतातत्त्वमुपास्महे

श्रीसीतास्तोत्र सुधासागरः

सम्पादक—

अवधकिशोरदास श्रीवैष्णव

"प्रेमनिधि"

स्वमनोरथ निवेदन स्तोत्रम्

यद्यपि गुणगणानामवधिरासीत्सुखात्मा दिनमणिकुलभानु र्भावनीयो जनानाम् ।
निमिकुलकुमुदानां चन्द्रिके चित्रशोभे तदपि तवगुणानां दीप्तिरासीत् विशेषात् ॥१॥

यथा स्वकीयैर्गुण रूपरत्नैर्क्रीतः स्वकान्तो नृपनाथ पुत्रः ।
मनोरथान् सिद्धयतु सा मदीयान्नाम प्रयुक्तान्मिथिलेन्द्र पुत्री ॥२॥

श्रीराघव प्राणपतीक्षुकानां श्रीजानकीपादरजः प्रपत्तिम् ।
विहाय तत्सिद्धिकरं न चान्यत्काल त्रयेलो कत्रयेऽपि कस्स्यात् ॥३॥

रामाय सत्साधनमेक सीता तस्यै परं साधनमस्ति रामः ।
एवम्प्रसक्ते परदेवतेद्वे परस्परं सिद्धिपदे भजामः ॥४॥

अस्त्वेव सन्मङ्गल मोदमूलं त्वत्पाद पद्मं मिथिलेन्द्र पुत्री ।
भर्त्तुः कराकल्पित लक्तचित्रं पवित्रपोतं भजतां भवाब्धौ ॥५॥

कण्ठे विधायात्मभुजां स्वभर्तुर्मध्याह्नके भोजनकोत्तरे च ।
स्वापायने मञ्चसमाश्रितायाः सुकल्पवीटिं वरनागवल्याः ॥६॥

बिम्बाधरारक्त विविक्तरागे मुखे प्रदास्यामि कदा तवाहम् ।
इत्याभिलाषो हृदये सदा मे यदानुगृह्णासि तदैव सिद्धिः ॥७॥

न कामुकी ते परिचारिका वै सम्बन्धमात्रं परिकामयेऽहम् ।
कान्ते रमन्तीं परशीलये त्वां ताम्बूल वारि व्यजनादिभिश्च ॥८॥

त्वत्पादपाथोजपरागसिद्धि भजे न भाग्यं किल स्वात्मनिष्ठम् ।
इष्टप्रदे राघवपट्टकान्ते स्वेष्टं मदीयं तव पादसेवा ॥९॥

गन्धर्वयक्षोरगकिन्नराणां वेतालविद्याधरदिक्पतीनाम् ।
देवाप्सरोभूमिभुजां च पुत्र्यो रामे प्रकामं नितरां रमन्ते ॥१०॥

तत्रास्ति तासां तपसां फलम्वा किमस्तितासामति रूपसम्यक् ।
तत्कारणं ते मिथिलेन्द्र पुत्रि कृपा च शीलञ्च ह्युदारता च ॥११॥

भविष्ययोगो हि भजत्कृपालौ स्याम्मे न रामे खलु तस्य तत्वम् ।

तस्योपविष्टा किल योगमुद्रा श्रीर्लभ्य सिद्धिः कथमेव नहि ॥१२॥
पूर्णा हि ते राघव पादुकाऽस्ते कृपानिधौ चेद् गमितेन या ता ।
कथं नु तावच्च मनोरथेन्दुः पूर्णोऽभवेन्मे कलया कृपालो ॥१३॥

सुकान्तिरुवाच—

हे सीते जनकात्मजे रघुवरप्राणप्रिये श्रूयताम्—
पादौ पद्ममनो हरौ भवति ते सन्मन्दिरम्मेसदा ।
तत्रैवेहि प्रवेहि निश्चलधिया सद्भिश्च संसेवितम्—
नान्यं चास्ति हि मास्तु किञ्च सुखदस्त्वत्पादमित्रं गृहम् ॥१४॥

या-या मे हृदये मनोरथतती दुर्घट्यमानाप्यसौ—
त्वत्पादस्मरणात्समस्तविधिना सम्पूजिता सत्फलैः ।
साक्षात् स्वामिनि तत् पदाब्जयुगलं सद्भक्ति माध्यञ्जने—
द्रष्टुमिच्छामि न दृश्यतेति सुखदं लोकत्रये वस्तु तत् ॥१५॥

॥ इति श्रीअमररामायणोक्तं श्रीसुकान्तिप्रोक्तं स्वमनोरथनिवेदनस्तोत्रम् सम्पूर्णम् ॥

—: स्वमनोरथनिवेदन स्तोत्रम् :—

यद्यपि आनन्दात्मा सूर्यवंश सूर्य स्वरूप श्रीरामजी भावना करने वाले प्रेमीजनों के उपासनीय समस्त गुण गणों के गम्भीर समुद्र ही हैं तथापि निमिकुलकुमुदों को विकसित करने वाली चन्द्रिका रूपी विचित्र शोभा सम्पन्न हे श्री किशोरी जी आपके गुणगणों की दीप्ति कुछ विशेष ही है इसमें कोई संशय नहीं है ॥ १ ॥ जिसने अपने अनुपम गुण रूपी रत्नों द्वारा चक्रवर्तिराजेन्द्रकुमार अपने स्वामी को खरीद लिया है, वह श्रीमिथिलेन्द्रराजकुमारीजू मेरे मनोरथों को पूर्ण करें ॥ २ ॥ श्री राघवेन्द्र जू को जो अपनी भावना से प्राणपति बनाना चाहती हैं उनके लिये श्री जानकी जी के चरण धूलि की शरणागति ही एकमात्र उपाय है । इसको छोड़कर तीन लोक में तीन काल में अन्य कोई साधन सिद्धि प्रदान करने में कदापि समर्थ नहीं हो सकता है ॥ ३ ॥ रामजी की कृपा प्राप्ति का साधन श्रीसीताजी हैं, तथा श्रीसीताजी की कृपा प्राप्ति का साधन श्रीरामजी ही हैं । इस प्रकार परस्पर सिद्धि प्रदान करने वाले परात्पर ये दोनों देवताओं का भजन करते हैं ॥ ४ ॥ हे मिथिलेन्द्र पुत्री ! आपके चरणारविन्द ही सद् मंगलमोद के मूल कारण हैं । भजन करने वाले भक्तों को भवसागर तरने के लिए आपके भर्ता प्रभु श्रीराम का करावलम्बन ही पवित्र पोत (जहाज) है, क्योंकि उन्होंने अपने करकमल में आपके श्रीअंग का रंग धारण कर रखा है ? ॥ ५ ॥ मध्याह्न काल के भोजनोपरान्त अपने प्राणपति के कण्ठ में ललित भुजा डालकर मंच (शय्या) पर शयन करने जाते समय कल्पलता के सदृश नागरवेल के पान कीबीड़ा बनाकर आपके बिम्बाफल

के समान लाल ओठों को अधिक अनुरक्त करने के लिये मैं कब प्रदान करूंगी । यह अभिलाषा मेरे मन में सदैव बनी रहती है परन्तु जब आप अनुग्रह करेंगी तभी मेरे हृदय की भावना परिपूर्ण होगी ॥ ६-७ ॥ मैं संसार की तुच्छ कामना के वशीभूत होकर नहीं मैं तो विशुद्ध भाव से आपकी परिचारिका (दासी) का सम्बन्ध मात्र प्राप्त करना चाहती हूँ । आप जब अपने प्राणनाथ के साथ विहार विलास करती रहोगी तब मैं पानबीड़ा-पंखा तथा मधुर शीतल जल प्रदान कर आपकी परिचर्या से प्रसन्न रहूँगी ॥ ८ ॥ आपके चरण कमल के पराग धूलि की सेवा ही मेरी परम सिद्धि है, मेरा ऐसा भाग्य नहीं है जो मैं आत्मानन्द रमण करने वाले स्वामी को प्राप्त करने वाले स्वामी को प्राप्त हो जाऊं । हे श्री राघवेन्द्र जू की पटराणी ! मेरी तो इष्ट सिद्धि प्रदायक आपके श्रीचरणों की सेवा ही है ॥ ६ ॥ गन्धर्व यक्ष-नाग-किन्नर-वेताल-विद्याधर-दिकपाल-देव-अप्सरा तथा पृथिवी के राजाओं की राजकुमारियाँ सब श्रीराम में ही सम्पूर्ण रीति से यथेष्ट रमण करती हैं ॥ १० ॥ उसमें क्या उनके तपस्या का फल प्राप्त हुआ हैं अथवा क्या उनका ऐसा ही विलक्षण स्वरूप सौन्दर्य हैं ? नहीं-नहीं ये कुछ भी नहीं हैं उसका कारण तो हे श्री मिथिलेशकुमारी जू ! केवल आपकी कृपा उदारता और शालीनता ही है ॥ ११ ॥ परम कृपालु आप तथा श्रीराम युगलप्रभु के मिलन का योग नहीं होता है इसमें भी क्या कोई रहस्य है क्योंकि उसकी उपदेष्टा जब स्वय श्री योगमुद्रा जी हैं तब हमको दर्शन की सिद्धि दुर्लभ ही क्यों रह जाती है ? ॥ १२ ॥ हे श्रीराघवजू की पटराणी श्रीकिशोरी जू ! आपकी कृपा प्राप्ति की तिथि को ही पूर्णा तिथि गणितज्ञ ज्योतिषियों ने बतलायी है तब मेरा मनोरथ रूपी चन्द्रमा की कलायें अभी तक पूर्ण क्यों नहीं हो रही है हे ? कृपालो ! इसका कारण तो आप हीं जाने ॥१३॥ श्रीसुकान्तजी बोलीं—हे सीते ! हे रघुवर ! प्राण प्रिये । मेरी एक बात सुनिये । आपके मन को हरण करने वाले युगल चरणारविन्द ही मेरा मन को रहने का सुन्दर मन्दिर बन जाय हे स्वामिनी जू ! हे श्रीवैदेही जू । आप सज्जनों से सुसेवित यही सुन्दर घर अविचल बुद्धि से हमको रहने के लिये दे दीजिये, हमको और कोई घर है ही नहीं, और आपके श्रीचरणों को छोडकर सुखप्रद घर अन्य कोई कभी होवे भी नहीं ॥ १४ ॥ मेरे हृदय में जो-जो दुर्लभ मनोरथो की लहरियां लहराती हैं, वह आपके चरणारविन्द के स्मरण से ही सम्पूर्ण होकर सुन्दर फल प्रदान कर सकती हैं । हे स्वामिनी जू । आपके युगल चरणारविन्द जो सद्भक्ति से भावित सज्जनों द्वारा आराधनीय हैं उनका मैं दर्शन करना चाहती हूं । उसके विना तीनों लोक में कोई भी सुख प्रदायक वस्तु दीखती ही नहीं है ॥

॥ यह श्री अमर रामायणोक्त "स्वमनोरथ निवेदन स्तोत्र" सम्पूर्ण हुआ ॥

॥ जय विदेह योगिराज ॥

जगति सकल कार्यं सुष्ठु सम्पदायन्तं- सतत हृदि परमानन्दसिन्धौ निमग्नम् ॥
श्वसुरममरवन्द्य रामचन्द्रस्य साक्षात्, निमिकुलतिलकं तं योगिवर्यं नमामि ॥

जगत् के सभी कार्य सुन्दर रूप से सम्पादन करते हुए जो मन से सदा सर्वदा परमानन्द समुद्र में निमग्न रहते हैं ऐसे देवताओं द्वारा अभिवन्दनीय साक्षात् श्रीरामचन्द्र प्रभु के श्वसुर निमिवंश तिलक योगिराज श्रीजानकीजी को मैं पुनः पुनः प्रणाम करता हूं ॥

—: अथ श्रीजानकी जयति स्तोत्रम् :—

अर्च्यां शिवार्चितां दिव्यैरलंकारैरलंकृताम् ।
स्तुतिं चकार स्तोत्रेण महाविष्णु महाशिवः ॥१॥

श्रीमहाविष्णुरुवाच—

जयति जनकपुत्री राम वामांक संस्था जयति युगविधात्रीं विश्वधात्रीं कराब्जा ।
कनकसदनशोभां लोकचित्रां लिखन्तीं रघुवरवरभागा भाविनी मंगलं मे ॥२॥
कनकभवन खण्डे पादसंचारणाढ्यै सितमणिगणभूमिः पद्मरागास्ति यस्या ।
जयतु जनकजाया चिन्मयी ब्रह्मरूपा रघुवरमुददात्री सद्गुणानां धरित्री ॥३॥
मुकुरगृहरमन्त्याश्चन्द्रकोटिश्चभित्तौ सततमुदयमस्या आस्य मेवा करोद्वै ।
कलित कमलश्रेणी तत्र तत्रैव जाता करकमल विभावैर्निर्दिशन्त्याश्च चित्रम् ॥४॥
जयति जनक पुत्र्याः पादपद्मप्रभावो यदनुगतनखानां पंक्तितश्चन्द्रपंक्तिः ।
विलसति खलु लोके भिन्न ब्रह्माण्डके स्वे तदभिगत कलंका शंकरस्यापि भाले ॥५॥
जयति जनकपुत्र्याः पादसंचारण श्रीश्चकितमपि विधत्ते यांच वीद्येन्द्र नागाः ।
निज हृदि तनुभावं राजहंसाः विदध्युः रघुवररस मूर्तिर्वीक्ष्य मोदाब्धि मग्नः ॥६॥
जयति जनकजायानेत्रयुग्मं विशालं रघुवर रसवांस सौकुमार्य्यादि भासम् ।
प्रणतजन दयार्द्रं कोप भावाऽस्पृशं वै मुकुलितमिवदोषान्वीक्षितुं सेवकानाम् ॥७॥
जयति जनकपुत्रया मुद्रिका कंकणाभ्यां विभूषित करयुग्मं कञ्जमेवाप्त नालम् ।
निजकृतदुरितेभ्य स्त्राशमेवाप्तकेषु स्वभयवरदमुद्रं स्वाशिषांवत्सुमुद्रम् ॥८॥
जयति जनकपुत्र्यारागविद्या समग्रं रघुपतिमति कर्षं मोदवर्षं विचित्रम् ।
अमितगति सुतालं मूर्छनाग्रामजालं स्वरमुनि मितयुक्तं ग्रामयुक्तं त्रिभिर्वै ॥९॥
जयति जनकजाया भारती भव्यरूपा वसुरसपरिपूर्णाशिब्दशद्मा मृतासा ।
ऋजु रचितपदानां संहिता संस्कृता या रघुपति मति दीक्षा लंकृतेयुग्मशिक्षा ॥१०॥
जयति जनकपुत्र्याः पारमैश्वर्यभावो सुरानरमुनिसिद्धैर्यच्छ्रया स्तूयमानः ।
अमित विभवलक्ष्मी लोकब्रह्माण्डभिन्नाः प्रभवति खलु यस्या अंशतस्तांनिषेवे ॥११॥

जगदुदयकरैका कालरूपाद्वितीया पुनरपिगतमध्ये पालने पातु दक्षा ।
तवपदनखा दीप्त्या शक्तिरेकासमर्था प्रभवति खलु सीतातिसृणां भूतभावा ॥१३॥
तब पतिपद स्वङ्कााद् ब्रह्मविष्णुर्हरोऽयं अनुजभबगतरूपास्तेऽपि ताभिःसमेता ।
रचयतिपुनरेकापालयेत् भक्षयेद्वै निवसति निजलोके यावदीक्ष्यास्ति ते वै ॥१३॥
त्वमसिपरतमेशी नैव त्वत्तः परास्यात्तवपति रघुनाथोऽसौ समस्तात्परात्मा ।
ननु भवति तु भेदोलिङ्ग व्याख्यानशास्त्रे भवति न खलुतत्त्वे राम सीतास्वरूपे ॥१४॥
तवगुणगण मूर्त्तिः स्यामहं रामचन्द्रः प्रथम गुरुवरं मे श्रीमहाशम्भुरास्ते ।
उररि कुरू ममेदं स्तोत्रकं रामसीते कृतमपि गुरूणा मे साहसं स स्वरोक्तम् ॥१५॥

श्रीयाज्ञवल्क्य उवाच—

एवं कृत्वा स्तवं देवं देवो महाविष्णुर्महाहरः ।
समूवाच शिवं देवं प्रशंसापूर्वया गिरा ॥१६॥

॥ इति श्रीजानकीजयतिस्तोत्रं सम्पूर्णम् ॥
श्रीस्वामी जनकराजकिशोरीशरण श्रीरसिक अली विरचित अमररामायणान्तर्गत
श्रीजानकीजयति स्तोत्रम् ॥

—:※:—

॥ श्रीजानकी जयति स्तोत्रम् ॥

श्रीमहाविष्णुरुवाचः—

परम पूज्या श्रीशिवजी द्वारा पूजनीय. दिव्य अलङ्कारों से अलंकृत श्रीजानकीजी के चरणों में नमस्कार कर श्रीमहाविष्णु तथा महाशम्भु ने इस प्रकार स्तोत्र पढ़कर श्रीजू की स्तुति प्रारम्भ की ॥ १ ॥

श्रीराम वामांग में विराजित श्री जनकलली की जय हो। युगों की बनाने वाली विश्व जननी हाथ में कमल पुष्प धारिणी आपका जय हो। कनकभवन की महाशोभा-विचित्र लोकचित्रों को लिखने वाली श्री रघुनाथ जी की श्रेष्ठ पत्नी, हमारे परम मङ्गल की भावना करने वाली आपका जय हो ॥ २ ॥ कनकभवन के प्रांगण में जिनके चरण कमलों के तलवों की लाली से स्फटिकमणिजटित भूमि भी लाल-लाल हो जाती है ऐसी श्री जनककुमारी चिदानन्दमयी-ब्रह्म स्वरूपा-श्रीरघुनाथजी को आनन्द प्रदाता-सद्गुणों की दिव्य भूमि श्री जानकी जी का जय हो ॥ ३ ॥ दर्पणों से जटित गृह में खेलती हुई अपने मुखचन्द्र की शोभा से उसकी काच भीतों में करोड़ों चन्द्रों का उदय करने वाली तथा चित्रों को दिखाने के लिये अंगुलि निर्देश करते समय अपने करकमल से कमलों की पंक्तियां निर्माण करने वाली हे सीते ! आपका जय हो ॥४॥ श्रीजनकदुलारी जी के उन श्रीचरणकमल के प्रभाव का सदा जय हो, जिनके साथ लगे हुए नखों की पंक्तियों से चन्द्रमा की अनन्त पंक्तियां उत्पन्न होती रहती हैं जो भिन्न भिन्न ब्रह्माण्ड गोलकों के आकाश

में शोभा देते रहते हैं तथा जिनकी एक कला भगवान् शंकर ने अपने ललाट में धारण कर चन्द्रमौलीश्वर पद प्राप्त किया है ॥ ५ ॥ श्री जनकराजकुमारी की मनोहर चलने की शोभा सदा विजयी रहे, जिसको देखकर मत्तगजेन्द्र भी चकित हो जाते हैं तथा राजहंस भी अपने को तुच्छ समझने लगते हैं एवं रसमूर्ति श्री रामचन्द्र जी आनन्द सिन्धु में निमग्न हो जाते हैं ॥ ६ ॥ श्रीविदेह राजनन्दिनी जू के विशाल दोनों नेत्र कमलों का सदैव जयकार हो। जो श्री रघुनन्दन जू के रस का शुभ निवास स्थान हैं, अत्यन्त सुकुमार हैं, प्रणतजन पर सदैव करुणा भरित रहते हैं, कोपभाव का कदापि स्पर्श नही करते हैं. तथा सेवकों के दोषों पर दृष्टिपात न हो इसलिए मानों संकुचित रहते हैं ॥ ७ ॥ मुद्रिका कङ्कणादि विभूषणों से विभूषित श्री जानकी जू के युगल करकमलों के समान अति सुन्दर है जो अपने किये हुए पापों के भय से भयभीत सज्जनों को अभयदान देने वाले तथा वरद मुद्रा से सुशोभित आशीर्वादों के समुद्र रूप हैं ॥ ८ ॥ श्री जनकराज पुत्री की समग्र राग विद्या की सदा जय हो, जो श्रीरामजी की मति को आकर्षित करने वाली तथा विचित्र आनन्द बरसाने वाली है. अपरम्पार ताल-गति-स्वर तथा मूर्छना तथा ध्वनि समूह के जाल से संयुक्त अति मनोहर है ॥ ९ ॥ श्रीजानकी जी की दिव्य भारती की सदैव जय हो, जो नवरस परिपूर्ण तथा अमृतमय सुन्दर शब्दों का मन्दिर है, कोमल पदों से संयुक्त संस्कृत तथा जो लौकिक पारलौकि उभय शिक्षा सम्पन्न श्री रघुपति की मति की अलङ्कार स्वरूपा है ॥ १० ॥ श्रीजनक लड़ैती जू के परमैश्वर्य भाव की सदा जय हो, जिनको सुर-नर-मुनि तथा सिद्धजन याचना तथा स्तुति करते हैं। तथा जिनकी सेवा करती हैं ऐसा निस्सीम वैभव है ॥ ११ ॥ एक जगत का उदय करती है. दूसरी उसका पालन करने में परम दक्षा है तो तीसरी उसका संहार करने में काल रूपा है ऐसी तीनों शक्तियों को सामर्थ्य प्रदान करने वाली आपके श्रीचरण कमल के नख की प्रभा है ऐसी एकमात्र समर्थ आपकी सदा जय हो ॥ १२ ॥ आपके पति की गोद से ब्रह्मा विष्णु महादेव अपनी शक्तियों के समेत प्रकट होते हैं. तथा उनका भी जब तक इच्छा होती है तब तक आपकी कृपा पालन करती है। ऐसी आपकी सदैव जय हो ॥ १३ ॥ आप ही परात्परा शक्ति हैं आप से श्रेष्ठ अन्य कोई परम शक्ति नहीं है, उसी प्रकार आपके पति श्री रघुनाथ जी सबसे परात्पर पूर्ण ब्रह्म परमात्मा हैं, आप में तथा उनमें तत्वतः कोई भेद नहीं है। भेद केवल कहने में तथा आकार में है वस्तुतः राम तथा सीता तत्व दोनों एक ही है ॥ १४ ॥ आपके गुणगणों की मूर्ति हम हो जावें, हमारे प्रथम गुरु श्री रामचन्द्र जी हैं तथा हमारे गुरुमुखी श्री महाशम्भु जी हैं हमारे इस स्तोत्र को श्रवण कर आप हमें कृतार्थ करें। हे श्रीसीतारामजी ! हमने यह बड़ा भारी साहस करके आपकी प्रार्थना की है ॥ १५ ॥

श्री याज्ञवल्क्य जी ने कहा:—

इस प्रकार महाविष्णु तथा महा शम्भु ने श्री किशोरी जू की स्तुति की तब उनके प्रति उनकी प्रसंसा करती हुई श्रीजानकीजी ने कल्याण प्रद वचन कहा ॥ १६ ॥

"यह श्री स्वामी जनकराज किशोरी शरणजी श्री रसक अली विरचित 'अमर रामायणान्तर्गत' श्रीजानकी जयति स्तोत्र सम्पूर्ण हुआ।"

॥ श्रीजानकी प्रार्थना स्तोत्रम् ॥

श्रीसूत-उवाच—

दर्शनार्थं ययौ सीता रमापादस्य वै मुनेः । नूपुराणां ध्वनिश्रुत्वा नेत्रे चोन्मील्य योगिराट् ॥

ददर्शाग्रे महातेजा रामं नारायणं हरिम् । सीतां लक्ष्मीं ततो दृष्ट्वा प्रणनाम मुनीश्वरः ॥

प्रणतः पूजितस्ताभ्यां सीतया राघवेण च । तुष्टाव जानकीं देवीं प्रणम्य शिरसा मुनिः ॥

श्रीरमापाद उवाच—

जयत्वं पद्मपत्राक्षि जयत्वं राघव प्रिये । जगन्मातर्महालक्ष्मि संसारार्णवतारिणी ॥४॥

महादेवि नमस्तुभ्यं नमस्तुभ्यं सुरेश्वरि । रामप्रिये नमस्तुभ्यं नमस्तुभ्यं दयानिधे ॥५॥

पद्मालये नमस्तुभ्यं नमस्ते राघवप्रिये । जगन्मातर्नस्तुभ्यं कृपावति नमोऽस्तुते ॥ ॥६॥

दयावति नमस्तुभ्यं नमो विश्वेश्वरप्रिये । नमः क्षीरार्णवसुते नमस्त्रैलोक्य धारिणि ॥७॥

विश्वेश्वरि नमस्तुभ्यं रक्षमां शरणागतम् । रक्ष त्वं देवदेवेशि देवदेवेशवल्लभे ॥८॥

दरिद्रात्त्राहि मां देवि कृपां कृत्वा ममोपरि । नमस्त्रैलोक्यजननि नमस्त्रैलोक्यपावनि ॥९॥

ब्रह्मादयो नमंति त्वां जगदानन्ददायिनि । रामप्रिये नमस्तुभ्यं नमस्तुभ्यं जगद्धिते ॥१०॥

आर्तिहरे नमस्तुभ्यं समृद्धिं कुरु ते नमः । अब्जवासे नमस्तुभ्यं चपलायै नमोनमः ॥११॥

नमस्ते शीघ्रगामिन्यै चपलायै नमो नमः । परिपालय मां मातर्दासं मां शरणागतम् ॥१२॥

शरणं त्वां प्रपन्नोऽस्मि कमले कमलानने । त्राहि त्राहि महादेवि परित्राणपरायणे ॥१३॥

किं बहूक्तेन भोसीते नमस्तेऽस्तु पुनः पुनः । अन्यं मे शरणं नास्ति त्वमेव शरणंमम ॥१४॥

सीतोवाच—

यत्त्वयोक्तमिदंपुण्यं ये पठिष्यन्ति मानवाः । श्रोष्यन्ति ये महाभक्त्या तेभ्यो दास्यामि सम्पदम् ॥

यः पठेत्प्रातरुत्थाय श्रद्धा भक्तिसमन्वितः । सुखसौभाग्यसम्पन्नो बुद्धिमानृद्धिवान्भवेत् ॥

पुत्रवान् गुणवान् श्रेष्ठो भोक्ता भवति मानवः । इदं स्तोत्रं महत्पुण्यं महादारिद्र्यनाशनम् ॥

क्षिप्रंप्रसादजननं चतुर्वर्गफल प्रदम् । सत्यं सत्यं पुनः सत्यं न देयं प्राकृते जने ।

इत्थं वरांस्तु मुनये दत्वा रामेण संयुता ॥१८॥

॥ इति श्रीसत्योपाख्यान रामायणे उत्तरार्द्धे चतुर्विंशोऽध्यायान्तर्गत श्रीजानकी प्रार्थनास्तोत्रं सम्पूर्णम् ॥

॥ श्रीजनकी प्रार्थना स्तोत्रम् ॥

श्रीसूतजी ने कहा:—

श्रीरमापाद महर्षि के दर्शनार्थ जब श्री जानकी जी गईं तब उनके श्रीचरण नूपुरों की ध्वनि सुनकर योगिराज ने अपने नेत्र खोले तो अपने सम्मुख महान् तेजस्वी नारायण स्वरूप श्रीहरि भगवान् श्री रामचन्द्र जी को तथा महालक्ष्मी श्रीसीताजी को देखकर मुनीश्वर श्रीरमापादजी ने श्रीयुगल प्रभु के चरणों में प्रणाम किया। उसी प्रकार श्रीसीता–रामजी के द्वारा भी पूजित हुए तथा उन्होंने भी मुनि के चरणों में प्रणाम किया। तत्पश्चात् श्रीजानकी देवी के चरणों में सिर झुका कर प्रणाम कर श्रीरमापाद मुनि उन्हें प्रसन्न करने के लिये स्तुति करने लगे ॥ १–२–३ ॥

हे कमल दल लोचनी आपका जय हो, श्रीराघव प्रिया जू का जय हो, जगन्माता–महालक्ष्मी संसार सागर से तारने वाली आपका जय हो ॥ ४ ॥ हे महादेवि ! हे सुरेश्वरि ! आपको नमस्कार है ॥ ५ ॥ हे कमल वासिनि ! हे श्रीराघव प्रिये मैं आपको प्रणाम करता हूँ। हे कृपा निधान जगन्माता मैं आपको नमस्कार करता हूँ ॥ ६ ॥ हे दयावती ! हे विश्वेश्वर प्रिये। आपको मैं प्रणाम करता हूँ। हे क्षीर सागर कन्ये ! त्रैलोक्य को धारण करने वाली मैं आपको प्रणाम करता हूँ ॥ ७ ॥ हे विश्वेश्वरि ! मैं आपका शरणागत हूँ आप मेरी रक्षा करिये। हे देव देवेश्वरि ! हे देव देवेश प्राणवल्लभे ! आप मेरी रक्षा करिये ॥ ८ ॥ मुझ पर कृपा करके दरिद्रता से आप मेरी रक्षा करिये। हे त्रैलोक्य माता ! हे त्रैलोक्य पावनी ! आपको पुनः पुनः प्रणाम करता हूँ ॥ ९ ॥

हे जगत् को परमानन्द प्रदान करने वाली श्रीरामप्रिया जू ! ब्रह्मादि देवगण आपके श्री चरणों में प्रणाम करते हैं ऐसी जगत् की हित कारिणी मैं आपको प्रणाम करता हूँ ॥ १० ॥ हे दुःख हारिणी आपको नमस्कार करता हूँ आप मुझे समृद्धिवान् बनाइये। हे कमल निवासिनी हे चपले ! आपको पुनः पुनः प्रणाम है ॥ ११ ॥ हे शीघ्र गामिनी ! हे विद्युद्वर्णिनी ! आपको नमस्कार है, हे माता ! इस शरणागत दास का आप कृपा कर प्रतिपालन करिये ॥ १२ ॥ हे कमले ! हे कमलमुखी ! हे महादेवी ! शरणागतों की रक्षा करने में सदा परायण रहने वाली मैं आपका शरणागत प्रपन्न हूँ। हे श्रीसीते मैं अधिक क्या कहूँ ! मेरा और कोई रक्षक नहीं है मैं तो केवल आपका ही शरणागत हूँ, आपका ही आधार हैं, मैं आपको पुनः पुनः प्रणाम करता हूँ ॥ १३–१४ ॥

श्रीजानकीजी ने कहा:—

हे श्रीरमापाद मुने ! यह जो आपने मेरा स्तोत्र पाठ किया है इसको महान् भक्ति पूर्वक जो कोई मनुष्य पढ़ेंगे अथवा श्रद्धा सहित सुनेंगे उनको मैं कृपा करके सम्पत्ति प्रदान करूँगी ॥ १५ ॥ जो प्रातः काल उठकर श्रद्धा भक्ति पूर्वक पाठ करेगा वह बुद्धिमान् ऋद्धि सिद्धि सम्पन्न

सौभाग्यशाली बनकर सुख भोगेगा ॥ १६ ॥ पुत्रवान्-गुणवान्-श्रेष्ठ तथा आनन्द का भोक्ता बनेगा। यह स्तोत्र महान् पुण्य वर्धक तथा महान् दुःख दारिद्र्य का नाश करने वाला है ॥ १७ ॥ यह शीघ्र ही प्रसन्नता उत्पन्न करने वाला अर्थ-धर्म-काम-मोक्ष प्रदायक है, यह मैं सत्य-सत्य पुनः सत्य बात कहती हूँ, इसे साधारण प्राकृत मनुष्य को कभी नहीं देना चाहिये। ऐसा वरदान देकर श्रीरामजी के सहित श्रीजानकीजी ने प्रस्थान किया ॥ १८-१९ ॥

"इस प्रकार श्री सत्योपाख्यान रामायण के उत्तरार्द्ध के चौबीसवें अध्याय के अन्तर्गत यह श्रीरमापाद मुनि प्रणीत श्रीजानकी प्रार्थना स्तोत्र सम्पूर्ण हुआ।"

एक प्रार्थना

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो-
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथा।
न जाने मुद्रास्ते तदपि च न जाने विलपनं-
परं जाने मातस्त्वदनुशरणं क्लेश हरणम् ॥

जगन्मातर्मातस्तव चरणसेवा न रचिता-
न वा दत्तं देवि द्रविणमपि भूयस्तव मया।
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे।
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥

—देव्यपराध क्षमापन स्तोत्रम्।

हे माता! मैं न तो मन्त्र जानता हूँ न यन्त्र, न स्तुति करना जानता हूँ न आवाहन, न ध्यान जानता हूं न स्तोत्र पाठ, न मुद्रा जानता हूँ और न विलाप करना। परन्तु हे मैया! मैं तो सर्व क्लेश हरण करने वाला एकमात्र आपके चरणों के पीछे पीछे चलना जानता हूँ ॥ हे जगदम्बे! मैंने कभी न तो आपके श्रीचरणों की सेवा की है और न आपने मुझको इतना धन ही दिया है जो आपकी सेवा में आड़े हाथ लुटाऊं। तथापि आप जो मेरे जैसे दीन-हीन पर अनुपम कृपा स्नेह करती हो उसका तो एक कारण है कि पूत तो कपूत होता है परन्तु माता कभी कुमाता नहीं होती ॥

श्रीजानकी सहस्रनाम

श्रीकविरुवाच—

नीलेन्दीवरलोचनां जनकजां विस्मेरविम्बाधरां ब्रह्माविष्णुमहेशसेव्यचरणां दीव्यत्सुवर्णप्रभाम् ।
सव्ये श्रीमिथिलेशितुः सुनयनाक्रोडे मुदा राजितां वन्दे वन्धुगणान्वितामनुचरीवृन्दैः समाराधिताम् ॥

अकल्पाऽकल्मषाऽकामा अकायाऽकारचर्चिता । अकारणाऽकोपपूज्या अक्रूरैकाऽक्षणाऽक्षरा ॥
अगदाऽगुणाऽग्रगण्या अचलापुत्रिकाऽचला । अच्युताऽजाऽजेयबुद्धिरज्ञातगतिसत्तमा ॥
अणोरणीयस्यतर्क्या अतीन्द्रियचयाऽतुला । अदभ्रमहिमाऽदृश्या अद्वितीयक्षमानिधिः ॥
अद्वितीयदयामूर्त्तिरद्वितीयानहङ्कृतिः । अदीनबुद्धिरद्वैता अधृताऽधोक्षजाऽनघा ॥
अनन्तविग्रहाऽनन्ता अनन्तैश्वर्यसंयुता । अनन्यभावसन्तुष्टा अनर्थौघनिवारिणी ॥
अनवद्यऽनामरूपा अनिर्देश्यस्वरूपिणी । अनिर्वाच्यसुखाम्भोधिरनिर्वाच्याङ्घ्रिमार्दवा ॥
अनिर्विण्णाऽनुकूलैका अनुकम्प्यैकविग्रहा । अनुत्तमाऽनुत्तमात्मा अनुरागभराश्रिता ॥
अपारमहिमाऽपारभववारिधितारिणी । अपूर्वचरिताऽपूर्वसिद्धान्ताऽपूर्वसौभगा ॥
अप्रकृष्टाऽप्रतिद्वन्द्वविक्रमाऽप्रतिमद्युतिः । अप्रतिमाऽप्रमत्तात्मा अप्रमेयसुखाकृतिः ॥
अप्राकृतगुणैश्वर्यविश्वमोहनविग्रहा । अभिवाद्याऽमलाऽमाना अमिताऽमृतरूपिणी ॥
अमृताऽमृतदृष्टिश्च अमृताशाऽमृतोद्भवा । अयोनिसम्भवाऽरौद्रा अलोलाऽवनिपुत्रिका ॥
अवराऽवर्ण्यमाधुर्य्या अवर्ण्यकरुणावधिः । अविचिन्त्याऽविशिष्टात्मा अव्यक्ताऽव्ययशेमुषी ॥
अव्याजकरुणामूर्त्तिरशोकाऽसङ्कुचकाऽसमा । असम्मिताऽऽसङ्कल्पा आत्मज्ञानविभाकरी ॥
आत्मोद्भवाऽऽत्ममर्मज्ञा आत्मलाभप्रदायिनी । आत्मवत्त्यादिकर्त्र्यादिराधारपरमालया ॥
आध्येयाङ्घ्रिसरोजाङ्का आनन्दामृतवर्द्धिनी । आम्नायवेद्यचरणा आश्रितत्राणतत्परा ॥
आसक्त्यपहृताशक्तिरास्यस्पर्द्धिविधुव्रजा । आह्लादसुषमासिन्धुरिनवंश्यपरप्रिया ॥
इन्दुपूर्णोल्लसद्वक्त्रा इभराजसुतागतिः । इयत्त्वरहितैर्वाल्वी प्रपन्नसकलापदाम् ॥
इष्टा समस्तदेवानामीप्सितार्थप्रदायिनी । ईश्वरी सर्वलोकानामुच्छिन्नाश्रितसंशया ॥
उज्ज्वलैकसमाराध्या उत्फुल्लेन्दीवरेक्षणा । उत्तरोत्तानहस्ताब्जा उत्तमोत्सङ्गभूषणा ॥
उदारकीर्त्तनोदारचरितोदारवन्दना । उदारजपपाठेज्या उदारध्यानसंस्तवा ॥२१॥

उदारवल्लभोदार वीक्षणास्मितभाषिता । उदार श्रीनामरूपलीलाधामगुणाव्रजा ॥२२॥
उदारालिगणोदारोपासका ऋतरूपिणी । ऋभुवन्द्याङ्घ्रिऋकारा लृपुत्री लृस्वरूपिणी ॥२३॥
एकैकशरणं पुंसामैक्यभावप्रसादिता । श्रोकःप्रधानिकौजोऽब्धिरौदार्यौत्कर्ष्यविश्रुता ॥२४॥
कमला कमलाराध्या करणं कलभाषिणी । कलाधारा कलाभिज्ञा कलामूर्त्तिः कलावधिः ॥२५॥
कल्पवृक्षाश्रया कल्प्या कल्मषौघनिवारिणी । कल्याणदात्री कल्याणप्रकृतिः कामचारिणी ॥२६॥
कामदा काम्यसंसक्तिः कारणाद्वयकारणम् । कारुण्यार्द्रविशालाक्षी कालचक्रप्रवर्तिका ॥२७॥
कीनाशभयमूलघ्नी कुञ्जकेलिसुखप्रदा । कुञ्जराधीशगतिका कृतज्ञार्च्या कृतागमा ॥२८॥
कृपापीयूषजलधिः कोमलार्च्चपदाम्बुजा । कौशल्याप्रतिमाम्भोधिः कौशल्यासुतवल्लभा ॥२९॥
खरारिहृदयातुल्यपरमोत्सवरूपिणी । खलान्यमतिसन्दात्री खवासीशादिवन्दिता ॥३०॥
खेलमात्रजगत्सृष्टिर्गणनाथार्च्चिता गतिः । गतैश्वर्यस्मयश्रेष्ठा गभीरा गम्यभावना ॥३१॥
गहनाग्रचा गीर्गीर्वाणहितसाधनतत्परा । गुप्ता महेशया गुह्या गेयोदारयशस्ततिः ॥३२॥
गोपनीयपदासक्तिर्गोप्त्री गोविंदनुत्तमा । ग्रहणीयशुभादर्शा ग्लौपुञ्जाभनखच्छविः ॥३३॥
घनश्यामात्मनिलया घर्मद्युतिकुलस्नुषा । घृणालुका ङस्वरूपा चतुरात्मा चतुर्गतिः ॥३४॥
चतुर्भावा चतुर्व्यूहा चतुर्वर्गप्रदायिनी । चतुर्वेदविदां श्रेष्ठा चपलासत्कृतद्युतिः ॥३५॥
चन्द्रकलासमाराध्या चन्द्रविम्बोपमानना । चारुशीलादिभिः सेव्या चारुसंपावनास्मिता ॥३६॥
चारूरूपगुणोपेता चारुस्मरणमङ्गला । चार्वङ्गी चिदलङ्कारा चिदानन्दस्वरूपिणी ॥३७॥
छविच्छन्धरतिः छिन्नप्रणताशेषसंशया । जगत्क्षेमविधानज्ञा जगत्सेतुनिवन्धिनी ॥३८॥
जगदादिर्जगदात्मप्रेयसी जगदात्मिका । जगदालयवृन्देशी जगदालयसङ्घसूः ॥३९॥
जगदुद्भवादिकर्त्री जगदेकपरायणम् । जगनेत्री जगन्माता जगन्माङ्गल्यमङ्गला ॥४०॥
जगन्मोहनमाधुर्यमनोमोहनविग्रहा । जतुशोभिपदाम्भोजा जनकानन्दवर्द्धिनी ॥४१॥
जनकल्याणसक्तात्मा जननी सर्वदेहिनाम् । जननीहृदयानन्दा जनबाधानिवारिणी ॥४२॥
जयसन्तापशमनी जनित्री सुखसम्पदाम् । जनेश्वरेज्या जन्मान्तत्रासनिर्णाशचिन्तना ॥४३॥
जपनीया जयघोपाराध्यमाना जयप्रदा । जया जयावहा जन्मजरामृत्युभयातिगा ॥४४॥
जलकेलिमहाप्राज्ञा जलजासनवन्दिता । जलजारुणहस्ताङ्घ्रिर्जलजायतलोचना ॥४५॥
जवानतमनोवेगा जाड्यध्वान्तनिवारिणी । जानकी जितमायैका जितामित्रा जितच्छविः ॥४६॥
जितद्वन्द्वा जितामर्षा जीवमुक्तिप्रदायिनी । जीवानां परमाराध्या जीवेशी जेतृसद्गतिः ॥४७॥

जेत्री ज्ञानदा ज्ञानपाथोधिर्ज्ञानिनां गतिः । ज्ञेयाऽऽत्महितकामानां ज्येष्ठा ज्योत्स्नाधिपानना॥
ज्वरातिगा ज्वलत्कान्तिर्ज्वालामालासमाकुला । झणन्नूपुरपादाब्जा झम्पाकेशप्रसादिता ॥
झषकेतुप्रियायूथसञ्चितच्छबिमोहिनी । झाटवाटोत्सवाधारा ञरूपा टुगट्टकेतरा ॥
ठात्मिका डम्बरोत्कृष्टा ढामराधीशगामिनी । ढुण्ढीष्टदेवता ढक्कामञ्जुनादप्रहर्षिता ॥
णकारा तडिदोघाभदीप्ताङ्गी तत्वरूपिणी । तत्वकुशला तत्वात्मा तत्वादिस्तनुमध्यमा ॥
तन्तुप्रवर्द्धिनी तन्वी तपनीयनिभद्युतिः । तपोमूर्त्तिस्तपोवासा तमसः परतः परा ॥
तमोघ्नी तापशमनी तारिणी तुष्टमानसा । तुष्टिप्रदायिका तृप्ता तृप्तिस्तृप्त्येककारिणी॥
तेजः स्वरूपिणी तेजोवृषा तोयभवार्चिता । त्रिकालज्ञा त्रिलोकेशी थै थै शब्दप्रमोदिनी ॥
दक्षा दनुजदर्पघ्नी दमिताश्रितकण्टका । दम्भादिमलमूलघ्नी दयार्द्राक्षी दयामयी ॥
दशस्यन्दनजश्रेष्ठा दाक्षिण्याखिलपूजिता । दान्ता दारिद्र्यशमनी दिव्यध्येयशुभाकृतिः ॥
दिव्यात्मा दिव्यचरिता दिव्योदारगुणान्विता । दिव्या दिव्यात्मविभवा दीनोद्धरणतत्परा ॥
दीप्ताङ्गी दीप्तमहिमा दीप्यमानमुखाम्बुजा । दुरासदा दुराराध्या दुरितघ्नी दुर्मर्षणा ॥
दुर्ज्ञेया दुष्प्रकृतिघ्नी दुःस्वप्नादिप्रणाशिनी । द्युतिर्द्युतिमती देवचूडामणिप्रभुप्रिया ॥
देवताहितदा दैन्यभावार्चिरसुतोषिता । धराकन्या धरानन्दा धरामोदविवर्धिनी ॥
धरारत्नं धर्मनिधिर्धर्मं सेतुनिबन्धिनी । धर्मशास्त्रानुगा धामपरिभूततडिद्द्युतिः ॥
धृतिर्ध्रुवा नीतिप्रीता नयशास्त्रविशारदा । नामनिर्धूतनिरया निगमान्तप्रतिष्ठिता ॥
निगमैर्गीतचरिता नित्यमुक्तनिषेविता । निधिर्निमिकुलोत्तंसा निर्मित्तज्ञानिसत्तमा ॥
नियतेन्द्रियसम्भाव्या नियतात्मा निरञ्जना । निराकारा निरातङ्का निराधारा निरामया ॥
निर्व्याजकरुणामूर्त्तिर्नीतिः पङ्केरुहेक्षणा । पतितोद्धारिणी पद्मगन्धेष्टा पद्मजार्चिता ॥
पद्मपादा पद्मवक्त्रा पद्मिनी परमेश्वरी । परब्रह्म परस्पष्टा पराशक्तिः परिग्रहा ॥
परित्रात्री परिश्लाध्या परेष्टा पर्यवस्तिा । पवित्रं पाटवाधारा पातिव्रत्यधुरन्धरा ॥
पापिपापौघसंहर्त्री पारिजातसुमार्चिता । पावनानुत्तमादर्शा पावनी पुण्यदर्शना ॥
पुण्यश्रवणचरिता पुण्यश्लोकवरीयसी । पुष्पालङ्कारसम्पन्ना पुष्टिः पुष्टिप्रदायिनी ॥
पूतात्मा पूतसर्वेहा पूज्यपादाम्बुजद्वया । पूर्णा पूर्णेन्दुवदना प्रकृतिः प्रकृतेः परा ॥
प्रकृष्टात्मा प्रणम्याङ्घ्रिः प्रणयातिशयप्रिया । प्रणतातुल्यवात्सल्या प्रणतध्वस्तसंसृतिः ॥
प्रणविनो प्रतिष्ठात्री प्रथमा प्रथिता प्रधीः । प्रपन्नरक्षणोद्योगा प्रवित्तं प्रविशारदा ॥

प्रह्वी प्राणप्रदा प्राणनिलया प्राणवल्लभा । प्राणात्मिका प्रार्थनीया प्रियमोहनदर्शना ॥
प्रियार्हा प्रीतितत्वज्ञा प्रीतिदा प्रीतिवर्धिनी । प्रेज्या प्रेमरता प्रेमवल्लभातीवल्लभा ॥
प्रेमवारां निधिः प्रेमविग्रहा प्रेमवैभवा । प्रेमशक्त्येकविवशा प्रेमसंसाध्यदर्शना ॥
प्रेमैकहाटकागारा प्रेमैकाङ्कनविग्रहा । फणीन्द्रावर्ण्यविभवा फलरूपा शुभकर्मणाम् ॥
बुद्धिदा बुधमृग्याङ्घ्रिकमला बोधवारिधिः । ब्रह्मलेखातिगा ब्रह्मवेत्त्री ब्रह्माण्डवृन्दसूः ॥
भक्तत्राणविधानज्ञा भक्तिसंसाध्यदर्शना । भजनीयगुणोपेता भयघ्नी भवतारिणी ॥
भवपूज्या भवाराध्या भवोत्पत्त्यादिकारिणी । भाग्यैकसंशोधयित्री भावैकपरितोषिता ॥
भूतप्रसूतिर्भूतात्मा भूतादिर्भूतिदायिनी । भूतिमत्समुपास्याङ्घ्रिर्भूसुता भ्रान्तिहारिणी ॥
मङ्गलाशेषमाङ्गल्या मङ्गलैकमहानिधिः । मधुरा मधुराकारा मननीयगुणावलिः ॥
मनोजवा मनोज्ञाङ्गी मनोरमगुणान्विता । मनः स्वरूपा महती महनीयगुणाम्बुधिः ॥
महद्धर्चका महाकीर्तिर्महाकोशा महाक्रतुः । महाक्रमा महागर्ता महाछविर्महाद्युतिः ॥
महादृष्टिर्महाधाम्नी महानन्दस्वरूपिणी । महानायकसम्मान्या महानैपुण्यवारिधिः ॥
महापूज्या महाप्राज्ञा महाप्रेज्या महाफला । महाभागा महाभोगा महामतिमतां वरा ॥
महामाधुर्यसम्पन्ना महामायास्वरूपिणी । महायोगप्रसाध्यैका महायोगेश्वरप्रिया ॥
महारतिर्महालक्ष्मीर्महाविद्यास्वरूपिणी । महाशक्तिर्महाश्रेष्ठा महाश्लाघ्ययशोऽन्विता ॥
महासिद्धिर्महासेव्या महासौभाग्यदायिनी । महाहविर्महार्हार्हा महिष्ठात्मा महीयसी ॥
महीशजा महोत्कर्षा महोत्साहा महोदया । महोदारा महेशादिसमालम्ब्याङ्घ्रिपङ्कजा ॥
माता समस्त जगतां माधुरीजितमाधुरी । मान्यापरमसम्मान्या मा मितकोकिलस्वना ॥
मिथिलेशक्रतूद्भूता मिथिलेश्वरनन्दिनी । मीनाक्षी मुक्तिवरदा मुनिसेव्यपदाम्बुजा ॥
मुनीन्द्रावर्ण्यमहिमा मूलप्रकृतिसंज्ञिता । मृगनेत्रा मृगाङ्काभवदना मृदुभाषिणी ॥
मृदुला मृदुलाचारा मृदुसंमोहनेक्षणा । मृदुस्वभावसम्पना मृद्वी मेधसमुद्भवा ॥
मेधेशी मैथिली मोदवर्षिणी मौढ्यभञ्जिका । यतचित्तेन्द्रियग्रामा युक्ता युक्तात्यभाषिता ॥
योगदा योगनिलया योगस्था योगिनां गतिः । योगिभिः समुपालम्ब्या योगिराजप्रियात्मजा ॥
रक्तोत्पललसद्धस्ता रघुनन्दनवल्लभा । रघुनाथस्वभावज्ञा रघुवीरसुखेरता ॥
रतिसौन्दर्यदर्पघ्नी रतीशेहाहरस्मृतिः । रविमण्डलमध्यस्था रविवंशेन्दुहृत्स्थिता ॥
रसज्ञा रसभावज्ञा रसानन्दविवर्धिनी । रमणीयगुणव्राता रमाराध्या रमालया ॥

रम्यरम्यनिधीं रम्याशेषा रसमयाकृतिः । रसापुत्री रसासक्ता रसिकानां परागतिः ॥१००॥
रसिकेन्द्रप्रिया राकाधिपपुञ्जनिभानना । राघवेन्द्रप्रभाज्ञा राधा रासरसेश्वरी ॥१०१॥
रासलीलाकलापज्ञा रासानन्दप्रदायिनी । रासेशी रूपदाक्षिण्यमण्डिता लक्ष्मणार्च्चिता ॥
ललनादर्शचरिता ललनाधर्मदीपिका । ललामैकनामरूपलीलाधामगुणादिका ॥१०३॥
ललिताम्भोजपत्राक्षी ललिताशेषचेष्टिता । लावण्यजितपाथोधिर्लाकृतिर्लीनरक्षिका ॥१०४॥
लीलाभूमाधवप्रेष्ठा लोककल्याणतत्परा । लोकत्रयमहाराज्ञीलोकमृग्याङ्घ्रिपङ्कजा ॥१०५॥
लोकज्ञा लोकशरणं लोकपावनपावनी । लोकप्रगीतमहिमा लोकानुत्तमदर्शना ॥१०६॥
लोकालयकलापाम्बा लोकोत्पत्यादिकारिणी । लोकेशकान्ता लोकेशी लोकैकप्रियकाङ्क्षिणी ॥
लोचनादीन्द्रियव्रातशक्तिसञ्चारकारिणी । लोपयित्री लोभहरा लोमशादिकभाविता ॥
वत्सरा वत्सलोत्कृष्टा वदान्या वनजेक्षणा । वनमालाश्रिता वभ्री वरणीयपदाश्रया ॥
वरदाधिराजकान्ता वरदा वरवर्णिनी । वरबोधा वरारोहाभूषिता वर्णनातिगा ॥११०॥
वर्णमाता वर्णश्रेष्ठा वर्णाश्रमविधायिनी । वर्ण्यानवद्यचित्केलिर्वर्द्धिनी सुखसम्पदाम् ॥१११॥
वशकृद्वशगश्रेष्ठा वश्या वसुप्रदायिनी । बहुश्रुतो वाच्यकीर्त्तिर्वाजिासनवन्दिता ॥११२॥
विकल्मषा विक्षरात्मा विगतेहा विजेतृका । विज्ञानदात्री विज्ञानमयाप्राकृतविग्रहा ॥११३॥
विज्ञा विज्वरा विदिता विदिशा विद्ययाऽन्विता । विद्यावत्पुञ्जवोत्कृष्टा विधात्री विधिकेतना ॥
विधिदुर्ज्ञेयमहिमा विधुपूर्णमुखाम्बुजा । विनयार्हा विनीतात्मा विपक्वात्मा विपद्धरा ॥
विमत्सरा विमलार्च्या विमुक्तात्मा विमुक्तिदा । विमोहिनी वियन्मूर्त्तिर्विरतिप्रदचिन्तना ॥
विरामा विलसत्कान्तिर्विबुधर्षिगणार्चिता । विवेकपरमाधारा विवेकवदुपासिता ॥११७॥
विशदश्लोकसम्पूज्या विशालेन्दीवरेक्षणा । विशिष्टात्मा विशेषज्ञा विश्वलीलाप्रसारिणी ॥
विश्वतः पाणिपादास्या विश्वमात्रैकधारिणी । विश्वम्भरा विश्वात्मा विश्वालयव्रजेश्वरी ॥
विश्वासरूपा विश्वेषां साक्षिणी विस्तृतोत्तमा । वीणावाणी वीतभ्रान्ति वीतरागस्मयादिका ॥
वीतशङ्कसमाराध्या वीतसम्पूर्णसाध्वसा । बुधाराध्याङ्घ्रिकमला वृषपा वेदकारणम् ॥
वेदगा वेदनिःश्वासा वेदप्रणुतवैभवा । वेदप्रतिपाद्यतत्वा वेदवेदान्तकोविदा ॥१२२॥
वेदरक्षाविधानज्ञा वेदसारमयाकृतिः । वेदान्तवेद्या वेदान्ता वैदेही वैभवार्णवा ॥१२३॥
वङ्कचिकुरा वङ्कभ्रूर्वङ्काकर्षणवीक्षणा । शक्तिव्रजेश्वरी शक्तिः शतमूर्त्तिः शतोदिता ॥१२४॥
शब्दब्रह्मातिगा शब्दविग्रहा शमदायिनी । शमिताश्रितसंक्लेशा शमिभक्त्याशुतोषिता ॥

शम्पादामोल्लसत्कान्तिः शम्प्रदध्यानसंस्तवा । शम्मयाशेषकैङ्कर्य्या शरणं सर्वदेहिनाम् ॥
शरणागतसंत्रात्री शरणैकाऽसुधारिणाम् । शवरीमानदप्रेष्ठा शान्ता शान्तिप्रदायिनी ॥
शाश्वतचिन्तनीयाङ्घ्रिकमला शाश्वतस्थिरा । शाश्वती शासिकोत्कृष्टा शिरोधार्यकराम्बुजा ॥
शिशिरा शीलसम्पन्ना शुचिगम्याङ्घ्रिचिन्तना । शुचिप्राप्यपदासक्तिः शुद्धान्तःकरणालया ॥
शुद्धा शुद्धिप्रदध्याना शूलत्रयनिवारिणी । शैलराजसुतादीष्टा शोभासागरसत्कृता ॥
शौर्यपाथोनिधिः श्यामा श्रयणीयपदाम्बुजा । श्रवणीययशोगाथा श्रीकरी श्रीप्रदायिनी ॥
श्रीमदुत्संसमहिता श्रीमयी श्रीमहानिधिः । श्रीलक्ष्म्यादिभिः सेव्या श्रीवासा श्रीसमुद्भवा ॥
श्रीः श्रुतिगीतचरिता श्रुत्यन्तप्रतिपादिता । श्रेयोगुणोरणा श्रेयोनिधिः श्रेयोमयस्मृतिः ॥
श्रोत्रियैकसमाराध्या श्लक्ष्णसूनृतभाषिणी । श्लाघनीयमहाकीर्त्तिः श्लीलचारित्र्यविश्रुता ॥
श्लोकलोकार्चिताब्जाङ्घ्रिः श्वसनाधीशसत्कृता । श्वेतधामोल्लसद्वक्त्रा षट्चतुर्वर्गस्त्रिलोदिता ॥
षडतीता षडाधारा षडर्द्धात्महृदिस्थिता । सखीमण्डलमध्यस्था सगुणा संत्रयोज्झिता ॥
सङ्ख्यातीतगुणा सङ्गमुक्ता सङ्गीतकोविदा । सङ्कीर्णप्रणताणा संग्रहोत्सर्जने रता ॥
सख्यशीघ्रसमासाद्या सज्जनोपासिताङ्घ्रिका । सतताराध्यचरणा सतीत्वादर्शदायिनी ॥
सतीवृन्दशिरोरत्नं सतीशाजस्रभाविता । सत्तमा सत्यधर्मैकपालिका सत्यरूपिणी ॥
सत्यसश्चिन्तना सत्यसन्धा सत्यापतिस्नुषा । सत्या सत्रधरागर्भोद्भूता सत्यवदग्रणीः ॥
सदाचारा सदासेव्या सद्दशातीतशेमुषी । सनातनी सनानम्या सन्तोषैकप्रदायिनी ॥
सन्देहापहरा सन्धिः सन्निषेव्यसमाश्रिता । सन्नुत्याशेषचरिता सभ्यलोकसभाजिता ॥
समग्रज्ञानवैराग्यधर्मश्रीयशोनिधिः । समग्रैश्वर्यसम्पन्ना समतीतगुणोपमा ॥
समदृष्टिः समर्च्यैका समर्थाग्रचा समर्धका । समविश्वमनोज्ञाङ्गी समवेद्याङ्घ्रिलाञ्छना ॥
समाकर्ण्ययशोगाथा समाहर्त्री समाहिता । समानात्मा समाराध्या समालम्ब्याङ्घ्रिपङ्कजा ॥
समावर्ता समासेव्या समार्हा समितिञ्जया । समीद्याव्याजकरुणा संविभाव्यसुविग्रहा ॥
सरयूपुलिनाक्रीडा सरला सरसेक्षणा । सर्गस्थित्यन्तप्रभवा सर्वकामप्रदायिनी ॥
सर्वकार्यबुधा सर्वच्छद्मज्ञा सर्वजन्मदा । सर्वजीवहिता सर्वज्ञानिनां ज्ञेयसत्तमा ॥
सर्वज्ञाननिधिः सर्वज्ञानवद्भिरुपासिता । सर्वज्ञा सर्वज्येष्ठादिः सर्वतीर्थमयस्मृतिः ॥
सर्वतोऽत्यास्यहस्ताङ्घ्रिकमला सर्वदर्शना । सर्वदिव्यगुणोपेता सर्वदुःखहरस्मिता ॥
सर्वदेवनुता सर्वधर्मतत्त्वविदां वरा । सर्वधर्मनिधिः सर्वनायकोत्तमनायिका ॥१५१॥

सर्वनीतिरहस्यज्ञा सर्वनैपुण्यमण्डिता । सर्वपापहरध्याना सर्वपावनपावनी ॥
सर्वभक्तावनाभिज्ञा सर्वभक्तिमतां गतिः । सर्वभावपदातीता सर्वभावप्रपूरिका ॥
सर्वभुक्तिप्रदोत्कृष्टा सर्वभूतहिते रता । सर्वभूताशयाभिज्ञा सर्वभूतासुधारिणी ॥
सर्वमङ्गलमाङ्गल्या सर्वमण्डनमण्डना । सर्वमेधाविनां श्रेष्ठा सर्वमोदमयेक्षणा ॥
सर्वमोहच्छिदासक्तिः सर्वमोहनमोहिनी । सर्वमौलिमणिश्रेष्ठा सर्वयज्ञफलप्रदा ॥
सर्वव्रतस्नाता सर्वयोगविनिःसृता । सर्वरम्यगुणागारा सर्वलक्षणलक्षिता ॥
सर्वलावण्यजलधिः सर्वलीलाप्रसारिणी । सर्वलोकनमस्कार्या सर्वलोकेश्वरप्रिया ॥
सर्वलोकेश्वरी सर्वलौकिकेतरवैभवा । सर्व विद्याव्रतस्नाता सर्ववैभवकारणम् ॥
सर्वशक्तिमतामिष्टा सर्वशक्तिमहेश्वरी । सर्वशत्रुहरा सर्वशरणं सर्वशर्मदा ॥
सर्वश्रेयस्करी सर्वसहा सर्वसदर्चिता । सर्वसद्भावनाधारा सर्वसद्भावपोषिणी ॥
सर्वसौख्यप्रदा सर्वसौभाग्यैकप्रदायिनी । साकेतपरमस्थाना साकेतपरमोत्सवा ॥
साकेताधिपतिश्रेष्ठा साकेतानन्दवर्षिणी । साक्षाच्छ्रीः साक्षिणी सर्वदेहिनां सर्वकर्मणाम् ॥
साधप्राणिजनारुष्टा सातपत्रोत्तमासना । साधनातीतसम्प्राप्तिः साध्या साध्वीजनप्रिया ॥
सामगा सामगोद्गीता साफल्यैकप्रदायिनी । सामर्थ्यंजगदाधारमोहिनी साम्यदायिनी ॥
सारज्ञा सिद्धसङ्कल्पा सिद्धसेव्यपदाम्बुजा । सिद्धार्था सिद्धिदा सिद्धिरूपिणी सिद्धिसाधनम् ॥
सीता सीमन्तिनीश्रेष्ठा सीरध्वजनृपात्मजा । सुकटाक्षा सुकीर्तीड्या सुकृतीनां महाफला ॥
सुकेशीसुखमूलैका सुखमन्दोहदर्शना । सुगया सुघनज्ञाना सुचार्वी सुजवोत्तमा ॥
सुज्ञा सुतन्वी सुदती, सुदाननिरताश्रया । सुधावाणी सुधीरात्मा सुधीश्रेष्ठा सुवीक्षणा ॥
सुनयनाक्रोडरत्नं सुनयनाप्रपोषिता । सुनयनामहाराज्ञीहृदयानन्दवर्द्धिनी ॥
सुनासा सुनिदिध्यास्या सुनीतिः सुप्रतिष्ठिता । सुप्रसादा सुभगायाः करपल्लवचर्चिता ॥
सुभागा सुभुजा सुभ्रूः सुमुखी सुरपूजिता । सुराध्यक्षा सुरानम्या सुराधीशजरक्षिका ॥
सुरेश्वरी च सुलभा सुवर्णाभाङ्गशोभना । सुवेद्यैका सुशरणं सुश्रीः सुश्लोकसत्तमा ॥
सृष्टदीनर्हितोपाया सृष्टिजन्मादिकारिणी । सेव्या सीरध्वजीज्येष्ठा सोमवत्प्रियदर्शना ॥
सौभाग्यजननी सौम्या स्थानं सर्वसुधारिणाम् । स्थिरा स्थूलदयाचैव स्थूलसूक्ष्मविलक्षणा ॥
स्रष्टृपात्रन्तकर्तॄणामीश्वरी स्वगतिप्रदा । स्वङ्घ्रिका स्वच्छहृदया स्वच्छन्दा स्वजनप्रिया ॥
स्वजनानन्दनिवहा स्वतर्क्या स्वधरस्मिता । स्वधर्माचरणाख्याता स्वधर्मावनपण्डिता ॥

स्वभावस्वरूपा स्वधृता स्वभावाघहरस्मिता । स्वभावापास्तनाशंस्या स्वभावावर्यमार्दवा ॥
स्वभावावाच्यवात्सल्या स्ववशा स्वस्तिदक्षिणा । स्वस्तिदा स्वस्तिरूपा च स्वामिनीसर्वदेहिनाम् ॥
स्वास्या स्वाश्रितसर्वेष्टदायिनी स्विष्टदेवता । स्वेच्छाचारेणरहिता हरिणोत्फुल्ललोचना ॥
हारसम्भूषिता हास्यस्पर्द्धिचन्द्रकरस्रजा । हितैका सर्वजगतां हृदयानन्दवर्द्धिनी ॥१८१॥
हृदयेशी च हृद्यैका हेमागारनिवासिनी । हेमासेव्यपदाम्भोजा हेयपादाब्जविस्मृतिः ॥
ह्लादिनी ह्रीमतांश्रेष्ठा क्षमाध्वस्तधरास्मया । क्षमास्वरूपा क्षमिणां क्षमेशी क्षान्तिविग्रहा ॥
क्षितीशतनया क्षेमदायिनी क्षेमयाऽर्च्चिता । सुता तवैषा कल्याणी सर्वोपास्येति मे मतम् ॥

इयं हि राजन् ! मृगपोतलोचना वागीश्वरीशैलसुतारमादिभिः ।
निषेव्यमाणाङ्घ्रिसरोरुहद्वया विराजते पूर्णसुधाकरानना ॥१८५॥
महामुनीनां यतिपुङ्गवानां योगेश्वराणां सुरसत्तमानाम् ।
सिद्धीश्वराणां त्रिगतैषणानां भोगार्थिनां मोक्षपदेच्छुकानाम् ॥१८६॥
हानीतरौत्सुक्यसमन्वितानां स्वजन्मनो भूमिपतेऽखिलानाम् ।
सम्भावनीया समुपासनीया ज्ञेयाऽनुगेया तनया तवेयम् ॥१८७॥
अनन्तनामानि तवात्मजायाः सन्ति क्षितीशप्रवराद्य तेषाम् ।
मया सहस्रेण मुदा प्रगीता तनोतु शं सेयमयोनिजा नः ॥१८८॥

हे राजन् ! आपकी मृग शिशु के समान सुन्दर नेत्र वाली चन्द्रमुखी ये श्रीललीजी के चरण कमल श्री सरस्वती जी, पार्वतीजी, श्रीलक्ष्मीजी आदि महाशक्तियों के द्वारा पूजित हैं अतः ये सर्वोत्कर्ष को प्राप्त हैं ॥ १८५ ॥ हे राजन् ! कहाँ तक कहें ! जितने भी सकाम, निष्काम, मोक्षाभिलाषी महामुनि, यतिशिरोमणि, योगिराज, देवश्रेष्ठ, सिद्धप्रवर, अपने मानव-जीवन की सफलता चाहने वाले हैं, उन सभी के लिये सब प्रकार से भावना करने योग्य, उपासना करने योग्य, तथा ज्ञान प्राप्त करने योग्य और बारम्बार गान करने योग्य आपकी ये ही श्रीललीजी हैं ॥ १८६-८७ ॥ हे भूमिनाथों में परम श्रेष्ठ श्री मिथिलेश जी महाराज ! आपकी श्रीललीजी के असंख्य नाम हैं उनमें से केवल इस समय मैंने जिनका सहस्र नाम से वर्णन किया है, वे अयोनिसम्भवा अर्थात् अपनी इच्छा से प्रकट हुई आपकी ये श्रीललीजी हम सबों का कल्याण करें ॥ १८८ ॥

भक्त्याऽनुरक्त्या पठतामजस्रं ध्यानान्वितानां तनया धरण्याः ।
दृग्गोचरी वाञ्छितसिद्धिदात्री भूयाद्‌द्रुतं नामसहस्रमेतत् ॥१८९॥

नृणां चतुर्वर्गविलोलचेतसां पाठ्यं ससङ्कल्पमिदं शुभावहम् ।
गिरीन्द्रकन्ये ! मधुराक्षरान्वितं श्रीजानकीनामसहस्रमन्वहम् ॥१९०॥

इति श्रीजानकी चरितामृते श्रीमिथिलेशनवयोगेश्वरसंवादे श्रीजानकीसहस्रनाम सप्ताशीतितमोऽध्यायः ॥ ८७ ॥

इस सहस्र नाम को ध्यान पूर्वक अनुराग के साथ, नित्य पाठ करने वालों को, अभीष्ट सिद्धि प्रदान करने वाली ये श्रीललीजी शीघ्र ही प्रत्यक्ष दर्शन प्रदान करें ॥ १८९ ॥ भगवान शिवजी बोले:—हे पार्वती ! धर्म, अर्थ, काम, मोक्ष की प्राप्ति के लिये जिनका चित्त चञ्चल हो रहा है उन्हें, मधुर अक्षरों युक्त, मङ्गलकारी इस श्रीजानकी सहस्रनाम का पाठ सङ्कल्प-पूर्वक प्रति दिन करना चाहिये ॥ १९० ॥

"यह श्रीजानकीचरितामृतम् का श्रीमिथिलेश महाराज तथा नव योगेश्वर संवाद में कवि नामक योगेश्वर कथित श्रीजानकी सहस्रनाम स्तोत्र सम्पूर्ण हुआ ।"

श्रीजानकीअष्टोत्तरशतनामस्तोत्रम्

श्रीशिव उवाच—

अष्टोत्तरशतं नाम्नामपीदानीं तदुच्यताम् । भवद्भिः सानुकम्पं मे सर्वज्ञाः श्रुतिमङ्गलम् ॥
साधु पृष्टं त्वया राजन् श्रूयमेकाग्रचेतसा । अष्टोत्तरशतं वक्ष्ये नाम्नां परमपावनम् ॥
सीरध्वजसुता सीता स्वाश्रिताभीष्टदायिनी । सहजानन्दिनी स्तव्या सर्वभूताशयस्थिता ॥
ह्लादिनी क्षेमदा शान्तिः पद्माक्षी हृदिस्थिता । श्रीनिधिः श्रीसमाराध्या श्रियः श्रीः श्रीमदन्विता ॥

श्रीजनकजी महाराज बोले:—हे सर्वज्ञ महर्षियों ! अब आप लोग श्रवण मात्र से मङ्गल करने वाले श्रीललीजी के अष्टोत्तर शतनामों को भी मुझे बतलाने की कृपा करें ॥ १ ॥ श्रीहरि नाम के योगेश्वर बोले:—हे राजन् ! आपका प्रश्न बहुत अच्छा है अतएव मैं श्रीललीजी के परम पावन अष्टोत्तर शतनामों का वर्णन करता हूँ आप उसका एकाग्रचित्त से श्रवण कीजिये ॥ २ ॥ (१) सीरध्वजसुता ❀ श्री सीरध्वज-महाराज के सुख का विस्तार करने वाली । (२) सीता ❀ अपने आश्रित चेतनों के समस्त दुःख शोकों की मूल आसुरी सम्पत्ति का विनाश करके दया, क्षमा, वात्सल्य, सौशील्य आदि दैवी सम्पत्ति के विस्तार द्वारा अनायास संसार सागर से पार उतारने वाली । (३) स्वाश्रिताभीष्टदायिनी ❀ अपने आश्रितों की हितकर इच्छाओं को पूर्ण करने वाली । (४) सहजानन्दिनी ❀ अपने शीलस्वभाव और गुणरूप आदि से सभी जड़ चेतनों

को स्वाभाविक आनन्द प्रदान करने वाली। (५) स्तव्या ❀ सभी के द्वारा सब प्रकार से स्तुति करने योग्या। (६) सर्वभूताशयस्थिता ❀ सम्पूर्ण प्राणियों के हृदयों में निवास करने वाली ॥३॥ (७) ह्लादिनी ❀ सम्पूर्ण चेतनों के हृदय में आह्लाद प्रदान करने वाली। (८) क्षेमदा ❀ कल्याण प्रदान करने वाली। (९) क्षान्ति ❀ सहनशीलता स्वरूपा। (१०) षडर्द्धाक्षहृदिस्थता ❀ त्रिनेत्र धारी (भगवान् शिवजी) के हृदय में निवास करने वाली। (११) श्रीनिधिः ❀ सम्पूर्ण शोभा कान्ति तथा धन की भण्डार स्वरूपा। (१२) श्रीसमाराध्या ❀ श्रीलक्ष्मणजी के द्वारा सम्यक् प्रकार से सेवित होने योग्य। (१३) श्रियः श्रीः ❀ कान्तिकी कान्ति और शोभा की शोभा स्व-रूपा। (१४) श्रीमदर्चिता ❀ तेज और सम्पत्तिशालीब्रह्मादि देव वृन्दों से पूजित ॥ ४ ॥

शरण्या वेदनिःश्वासा वैदेही विबुधेश्वरी। लोकोत्तराम्बा लोकादी रघुनन्दनवल्लभा ॥
रम्यरम्यनिधी रामा योगीश्वरप्रियात्मजा। यज्ञस्वरूपा यज्ञेशी योगिनां परमा गतिः ॥
मृदुस्वभावा मृदुला मैथिली मधुराकृतिः। मनोरूपा महेज्येज्या महासौभाग्यदायिनी ॥
भूमिजा बुधमृग्याङ्घ्रिकमला बोधवारिधिः। फलस्वरूपा तपसां फणीन्द्रावर्यवैभवा ॥

(१५) शरण्या ❀ सभी प्राणियों की सब प्रकार से रक्षा करने में पूर्ण समर्थ। (१६) वेदनिःश्वासा ❀ वेदमय श्वास वाली। (१७) वैदेही ❀ श्रीविदेहकुल की सर्वोत्कृष्ट राजदुलारी। (१८) विबुधेश्वरी ❀ ब्रह्मा, विष्णु, महेश, अग्नि, सूर्य, पवन, यम, कुबेर, इन्द्रादि सभी देवताओं पर शासन करने वाली। (१९) लोकोत्तराम्बा ❀ सम्पूर्ण प्राणियों की अपाञ्चभौतिक (दिव्य) माता। (२०) लोकादिः ❀ समस्त लोकों की कारण स्वरूपा। (२१) रघुनन्दनवल्लभा ❀ रघुकुल को वात्सल्य जनित आनन्द-प्रदान करने-वाले भगवान् श्रीरामजी की परम प्यारी ॥ ५ ॥ (२२) रम्यरम्यनिधिः ❀ सभी सुन्दरों में सुन्दर (भगवान् श्रीराघवेन्द्र सरकार) की निधि (भण्डार) स्वरूपा। (२३) रामा ❀ आकाश तत्व से, सहस्रों गुणा अत्यन्त सूक्ष्म होने के कारण सम्पूर्ण प्राणियों को अपनी गोद में खेलाने वाली और स्वयं विविध प्रकार के स्थूल सूक्ष्मादि रूपों के द्वारा सबके साथ खेलने वाली भगवान् श्रीरामजी की प्राणवल्लभा। (२४) योगीश्वरप्रियात्मजा ❀ योगियों पर शासन करने वाले श्रीमिथिलेश जी महाराज की प्यारी पुत्री। (२५) यज्ञस्वरूपा ❀ यज्ञ स्वरूप वाली। (२६) यज्ञेशी ❀ समस्त यज्ञों की रक्षा करने वाली। (२७) योगिनां परमा गतिः ❀ भगवत् प्राप्ति के साधकों का सब प्रकार से सम्हाल करने वाली ॥ ६ ॥ (२८) मृदु स्वभावा ❀ अत्यन्त कोमल स्वभाव वाली। (२९) मृदुला ❀ कोमल स्वभाव तथा अति कोमल अङ्गों वाली। (३०) मैथिली ❀ मिथिवंश में सबसे अधिक प्रख्यात श्रीमिथिलेश राजदुलारी जी। (३१) मधुराकृतिः ❀ अत्यन्त मनोहर तथा सर्वानन्द प्रदायक सुन्दर स्वरूप वाली। (३२) मनोरूपा ❀ मनके स्वरूप वाली। (३३) महेज्येज्या ❀ महान् पूजनीय श्रीब्रह्मा, विष्णु, महेशादि देव तथा उमा, रमा ब्रह्माणी आदि महाशक्तियों के द्वारा भी पूजने योग्य। (३४) महासौभाग्यदायिनी ❀ भक्तों को सर्वोत्तम सौभाग्य प्रदान करने वाली ॥ ७ ॥ (३५) भूमिजा ❀ पृथ्वी से प्रकट होने

वाली श्रीमिथिलेश राजदुलारी जी । (३६) बुधमृग्याङ्घ्रिकमला ❀ ज्ञानियों के खोजने योग्य जिनके एक श्रीचरण कमल ही हैं । (३७) बोधवारिधिः ❀ समुद्र के समान अथाह ज्ञान वाली । (३९) फणीन्द्रवर्ण्यवैभवा ❀ सहस्र मुख, (दो हजार जिह्वा) वाले श्रीशेषजी द्वारा भी जिनका ऐश्वर्य वर्णन करने में असम्भव ॥ ८ ॥

नमस्या प्रियदृष्टिश्च धरारत्नं धरासुता । दिव्यात्मा दीप्तमहिमा तत्त्वात्मा जनकात्मजा ॥
जगदीशपरप्रेष्ठा ज्ञानिनां परमायनम् । जगन्मङ्गलमाङ्गल्या जरामृत्युभयातिगा ॥
चन्द्रकलासुखासाध्या चिदानन्दस्वरूपिणी । चतुरात्मा चतुर्व्यूहा चन्द्रबिम्बोपमानना ॥
घनश्यामात्मनिलया गोप्त्री गुप्ता गुहेशया । गेयोदारयशः पङ्क्तिर्गतैश्वर्यकृतस्मया ॥

(४०) नमस्या ❀ समस्त प्राणियों के लिये एकमात्र नमस्कार भाजन । (४१) प्रियदृष्टिः ❀ प्रिय दर्शन वाली । (४२) धरारत्नम् ❀ पृथ्वी की सर्वोत्कृष्ट रत्न स्वरूपा । (४३) धरासुता ❀ पृथिवी के सुख समूह का विस्तार करने वाली । (४४) दिव्यात्मा ❀ अलौकि बुद्धि वाली (४५) दीप्तमहिमा ❀ विख्यात प्रभाव वाली । (४६) तत्वात्मा ❀ तत्व (ब्रह्म) स्वरूप वाली । (४७) जनकात्मजा ❀ श्रीजनक वंश में सर्वोत्तम महिमा वाली, श्री सीरध्वज राजकुमारी जी ॥ ९ ॥ (४८) जगदीश परप्रेष्ठा ❀ सचराचर प्राणियों पर शासन करने वाले ब्रह्मा, विष्णु, महेश, इन्द्र, यम आदि से उत्कृष्ट दिव्यधामाधिप भगवान् श्रीरामजी की परम प्यारी । (४९) ज्ञानिनां परमायनम् ❀ ज्ञानियों के चित्तवृत्ति के लिए सर्वोत्तम स्थान स्वरूपा । (५०) जगन्मङ्गलमाङ्गल्या ❀ चर अचर प्राणियों के मङ्गल का भी मङ्गल स्वरूपा । (५१) जरामृत्युभयातिगा ❀ बुढ़ापा और मृत्यु के भय से अछूती ॥ १० ॥ (५२) चन्द्रकला सुखासाध्या ❀ यूथेश्वरी श्री चन्द्रकला जी के द्वारा सुख पूर्वक प्राप्त होने के योग्य । (५३) चिदानन्द स्वरूपिणी ❀ जिसका सबकुछ चेतन एवम् आनन्दमय है, उस ब्रह्म को साकार स्वरूप वाली । (५४) चतुरात्मा ❀ मन, बुद्धि, चित और अहङ्कार इन चार स्वरूपों वाली । (५५) चतुर्व्यूहा ❀ श्रीभरत, लक्ष्मण, शत्रुघ्न इन तीनों भाइयों के समेत चार शरीर वाले श्रीराघवेन्द्र सरकार की पटरानी जी । (५६) चन्द्रबिम्बोपमानना ❀ शरद ऋतु के पूर्ण चन्द्र के बिम्ब के समान उज्वल प्रकाशमय, परम आह्लादकारी श्रीमुख-छटावाली ॥ ५७ ॥ घनश्यामात्मजा ❀ सजल मेघों के सदृश श्यामवर्ण श्रीराघवेन्द्र सरकार के हृदय में निवास करने वाली । (५८) गोप्त्री ❀ समस्त चर-अचर प्राणियों की रक्षा करने वाली (५९) गुप्ता ❀ भक्तों के हृदय रूपी वृक्ष में छिपी हुई । (६०) गुहेशया ❀ प्राणियों के हृदय रूपी गुफा में परमात्मा स्वरूप से शयन करने वाली । (६१) गेयोदारयशःपङ्क्तिः ❀ गान करने योग्य यश-समूह वाली । (६२) गतैश्वर्यकृतस्मया ❀ अपने अनुपम ऐश्वर्य के अभिमान से अछूती ॥ १२ ॥

गमनीयपदासक्तिः खलमात्रनिवारिणी । कृपापीयूषजलधिः कृतज्ञा कृतिसाधनम् ॥
कल्याणप्रकृतिः काम्या कल्याणी कामवर्षिणी । कारुण्यार्द्रविशालाक्षी कम्बुकण्ठी कलानिधिः ॥

केलिप्रिया कलाधारा कल्मषौघनिवारिणी । ॐ शब्दवाच्या ह्योजोऽब्धिरुदितश्रीरुदारधीः ॥
उदारकीर्त्तिरुदिता ह्युदारातुल्यदर्शना । इष्टप्रदेभगमना आदिजाऽऽह्लादिनी परा ॥
आश्रितवत्सलाऽऽराध्या ह्यनिर्देश्यस्वरूपिणी । अद्वितीयसुखाम्भोधिरव्याजकरुणापरा ॥
अनवद्याऽप्रमत्तात्मा अनन्तैश्वर्यमण्डिता । अमानाऽयोनिजाऽकोपा अविचिन्त्याऽनघस्मृतिः ॥

